1.103 शुद्धाद्वैत परिष्कार - प. ४ क्र. १ नं. १८ पु. ८२

श्रीवल्लभायनमः शुद्धाद्वैतप्रचारेण मायावादनिवर्त्तकान् श्री
मदाचार्यचरणान् प्रणमामि पुनः पुनः १ अथ शुद्धाद्वैतस्य किंल
क्षणमिति चेत् इतरसंबंधानवच्छिन्नकार्यकारणादिरूपद्वित्व
प्रकारकज्ञानप्रतियोगिताकाभाववत्त्वमिति गृहाण अत्रद्वित्वप्रका
रकज्ञानप्रतियोगिताकाभाववत्त्वमित्यनेनैवेतरसंबंधानवच्छिन्नत्व
प्रतीतेरनवच्छिन्नांतविशेषणस्य किंप्रयोजनमितिचेत्सत्यं कार्य
कारणादिद्वित्वप्रकारकपदार्थस्य मायिकत्वाभावायतत् शंकरा
मते चार्याणां मायाऽविद्योपाध्यवच्छिन्नेश्वरजीवरूपकार्यकारणसा
शुद्धत्वात् अन्यथातेषांमते कार्यकारणयोः शुद्धत्वे द्वैतापत्तिः अ

श्रु॰ द्वै॰ तएवस्वरूपलक्षणेसत्यादिपदलक्ष्यमेवब्रह्मसर्वत्रैवहिवाक्या
र्थोलक्ष्यएवेतिचास्थितमित्युक्तेः तत्रापिवदामः लक्षणायाः श
क्यसंबंधरूपत्वात् तस्यच द्विनिष्ठत्वाद्ब्रह्मणोसत्वेनवांत्वाशि
त्वापातः अध्यसंबंधस्यापिमायिकत्वमितिचेत् लक्ष्यत्वरूपध
र्मवत्वेनदोषस्तदवस्थलक्ष्यत्वमपितथैवचेत् भद्रं लक्षणा
वैयर्थ्यं किंचलक्ष्यस्यतीरस्यागंगात्ववत् सत्याहिलक्ष्यस्य
सत्यादित्वापातः उपाधिबाधस्यच श्रीमदाचार्यचरणादि
भिः खंडितत्वाल्लेह नन्मते अध्यस्तसंभवव्यभिचाराभ्यांस्यादि
शेषणवत् इतिन्यायेनविशेषणस्येतरभेदकत्वेनमाया
संबंधराहित्याभावादेवसावत्त्वाभावाद्योसिद्धम् १

विशेषणमितिचेत् दत्तोत्तरत्वात् बोधायननिरूपणीयत्वेनेतर
मतजन्यज्ञानस्यानिरसनीयत्वात् किंच संध्याधिकरणानुरो
धेनस्वाप्नसृष्टेर्मायिकत्वेनतद्भावत्त्वर्थवातत् स्वाप्नसृष्टेरवा
स्तविकत्वेनजाग्रत्सृष्टेश्चवास्तविकत्वेनभेदो वैधर्म्याच्च
नस्वप्नादिवदितिसूत्रादिभिर्व्याससिचरणैरेवप्रतिपादितः इत
रइतिसंबंधविशेषणांतुत्वलक्षणेधर्मधर्मिभावसंबंधावच्छि
तपात न्नस्यापिनिरासेशांकरमतप्रवेशावारणाय तर्हिधर्मधर्मि
भावसंबंधांगीकारेद्वित्वप्रकारकप्रतियोगिताकाभावाभावा
दव्याप्तिरितिचेत् धर्मिधर्मभावस्याभिन्नत्वस्य प्रकाशात्

शु·द्वै यवद्धातेजस्त्वादिसूत्रैर्निर्णीतत्वात् परास्यशक्तिरित्यादि
२ ष्वभेदएवमष्ट्यंगीकारात् एतेनभेदाभेदवादिनौ निंबार्कभा
स्कराचार्यौ प्रत्युक्तौ तत्राद्यस्य वास्तविकभेदाभेदत्वे मध्वाचा
यस्येवभेदस्य वास्तविकतयाद्वित्वप्रकारकेत्यादिनानिरस्त
त्वात् द्वितीयस्यत्वौपाधिकभेदाभेदे भेदस्यौपाधिकत्वेनेत
रसंबंधेत्यादिनाव्याहतत्वात् तर्हि अवछिन्नांतमेव तदिति
चेत् शंकरमतापत्तिः अतः कार्यादीति तर्हि रामानुजाचार्यमते
पिमायासंबंधाभाववत् कार्यकारणयोर्द्वैत तमातन्मतगवे
शश्तिचच्छृणु तन्मते हि चिदचिद्विशिष्टकार्यस्य सत्वेऽस्वमते नर
स्यसूक्ष्मस्यस्थूलस्यकारणस्य

ऽआत्मैवेदमग्रआसीदित्यादिश्रुत्याऽचितःकारणावस्थायानि
षेधात् केवलात्मनःकारणतयानतोवैलक्षण्यं कार्यावस्थाया
मपितेषांमतेपरस्पराभेदस्यवास्तविकत्वेनस्वमतेऽभेदस्यवास्त
विकत्वेनापिवैलक्षण्यं नचघटपटादीनामभेदोनसंभवती
तिवाच्यं सर्वेषांब्रह्मोपादानस्यैक्यत्वेन तस्यैवावस्थांतरत्वेन
चाभेदात् यथासुप्तउत्थित उपविष्टेच पुरुषेऽवस्थाभेदेपिन
उस्त्यभेदः किंचेतरसंबंधानवछिन्नत्वेनाचितोवास्तविकत्वनि
ल्चितस्यनिरासेननतत्रापिव्याप्तिः किंचविशिष्टाद्वैतमित्यस्य
विशेषणविशिष्टत्वेनविशेषणस्यचेतरव्यावर्त्तकत्वेनसंभवो

शु॰ द्वै॰ पेक्षितोत्र व्यावर्त्याभावत्वया वैशिष्ट्यकथनं नोपपद्यत इति
२ एतेन शैवोपदित्तोत्तरः भिक्षुस्तु अविभागाद्वैतवादमवलं
ब्यौपाधिककर्तृत्वादिकमंगीचकार तदपीतरसंबंधानव
च्छिन्नाभावत्वेन निरस्तं द्वित्वप्रकारकाद्यभावत्वात् तेन मध्वाचा
र्यमतस्य निरासः लीलास्थभावस्य बाधाभावाय प्रकाप्रकारणा
दिरूपमिति ज्ञानस्य विशेषणं द्वित्वप्रकारकप्रतियोगिता
काभावस्य मायावादमतेपीष्टत्वात् तन्निवारणाय ज्ञानस्ये
ति प्रतियोगिनि विशेषणमिति सु॰ अत्र शुद्धाद्वैतपदे को
सौ समास इति चेत् शुद्धं च तदद्वैतं चेति कर्मधारयः
अत्रेतरसंबंधानवच्छिन्नत्वे सति इत्येवं योज्यम् ॥ ३

उक्तलक्षणंतुशुद्धयोःकार्यकारणयोरितिषष्ठीतत्पुरुषपक्षे
वोध्यं अत्रनरसिंहतापिण्यांयोनिलंब्रह्मणःसमर्पयित्वा स
र्वंसर्वमयसर्वेजीवाःसर्वमयाःसर्ववित्स्थास्तुतथाप्यल्पा इत्या
द्युक्त्वासन्मात्रोनित्यःशुद्धोबुद्धःसत्योमुक्तोनिरंजनोविभुरद्व
यआनंदःपरःप्रत्यगेकरसःप्रमाणैरेतैरवगम्यतेइतिवाक्यंप
ठितं अग्रेचसर्वमलएवशुद्धोऽबाध्यस्वरूपोबुद्धःसुखस्वरूपआ
त्मेतिनिरूपितं सर्वंखल्विदंब्रह्मेत्यादिश्रुतिषुशुद्धाद्वैतंस्प
ष्टमेवप्रतीयतेइतिवोध्यंविस्तरस्तुमत्कृतशुद्धाद्वैतमार्त्त
ण्डप्रकाशेवोध्यः श्रीमद्गिरिधरणधीशपादांबुजपरागभ

शु० त् व्यलिखच्छ्रामकृष्णोसौ शुद्धाद्वैतपरिष्कृतिं १ इतिश्री
५ मत्प्रभुचरणात्मजश्रीमहाराजकुलकमलविभाकरगो
स्वामिश्रीगोपालात्मजनिश्रीमद्गिरिधरचरणदासानु
दासपरंपराप्रामराज्यरामकृष्णेन गुंफितः शुद्धाद्वैतपरि
कारोऽजाजीत्समाप्तताम् ॥१॥

शुद्धाद्वैत परिष्कार

सं. ५ गो. भा.